শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ২৪

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

श्रीः
श्रीमते कृष्णाय परब्रह्मणे नमः
श्रीमते रामानुजाय नमः

# ॥श्रीमन्नारायणीयम् ॥

## দশক - ২৪

*প্রহ্লাদচরিতৱর্ণনম্*

হিরণ্যাক্ষে পোত্রিপ্রৱরৱপুষা দেৱ ভৱতা
    হতে শোকক্রোধগ্লপিতধৃতিরেতস্য সহজঃ।
হিরণ্যপ্রারম্ভঃ কশিপুরমরারাতিসদসি
    প্রতিজ্ঞামাতেনে তৱ কিল ৱধার্থং মধুরিপো॥ ১ ॥

ৱিধাতারং ঘোরং স খলু তপসিত্বা নচিরতঃ
    পুরঃ সাক্ষাতকুর্ৱন্ সুরনরমৃগাদ্যৈরনিধনম্।
ৱরং লব্ধ্বা দৃপ্তো জগদিহ ভৱন্নাযকমিদং
    পরিক্ষুন্দনিন্দ্রাদহরত দিৱং ত্বামগণযন্॥ ২ ॥

নিহন্তুং ত্বাং ভূযস্তৱ পদমৱাপ্তস্য চ রিপো-
    র্বহির্দৃষ্টেরন্তর্দধিথ হৃদযে সূক্ষ্মৱপুষা।
নদন্নুচ্চৈস্তত্রাপ্যখিলভুৱনান্তে চ মৃগযন
    ভিযা যাতং মত্বা স খলু জিতকাশী নিৱৱৃতে॥ ৩ ॥

ততোস্য প্রহ্লাদঃ সমজনি সুতো গর্ভৱসতৌ
    মুনের্ৱীণাপাণেরধিগতভৱদভক্তিমহিমা।
স ৱৈ জাত্যা দৈত্যশিশুরপি সমেত্য ত্বযি রতিং
    গতস্তৱদভক্তানাং ৱরদ পরমোদাহরণতাম্॥ ৪ ॥

সুরারীণাং হাস্যং তৱ চরণদাস্যং নিজসুতে
    স দৃষ্টৱা দুষ্টাত্মা গুরুভিরশিশিক্ষচ্চিরমমুম্।
গুরুপ্রোক্তং চাসাৱিদমিদমভদ্রায দৃঢমি-
    ত্যপাকুর্ৱন্ সর্ৱং তৱ চরণভক্ত্যৈৱ ৱৱৃধে॥ ৫ ॥

www.prapatti.com

অধীতেষু শ্রেষ্ঠং কিমিতি পরিপৃষ্টেথ তনযে
ভৱদভক্তিং ৱর্যামভিগদতি পর্যাকুলধৃতিঃ।
গুরুভ্যো রোষিত্বা সহজমতিরস্যেত্যভিৱিদন
ৱধোপাযানস্মিন্ ৱ্যতনুত ভৱতপাদশরণে॥ ৬॥

স শূলৈরাৱিদ্ধঃ সুবহু মথিতো দিগগজগণৈ-
র্মহাসর্পৈর্দষ্টোপ্যনশনগরাহারৱিধুতঃ।
গিরীন্দ্রাৱক্ষিপ্তোপ্যহহ! পরমাত্মন্নযি ৱিভো
ত্বযি ন্যস্তাত্মত্বাত্ কিমপি ন নিপীডামভজত॥ ৭॥

ততঃ শঙকাৱিষ্টঃ স পুনরতিদুষ্টোস্য জনকো
গুরূক্ত্যা তদগেহে কিল ৱরুণপাশৈস্তমরুণত্।
গুরোশ্চাসান্নিধ্যে স পুনরনুগান্ দৈত্যতনযান
ভৱদভক্তেস্তত্ত্বং পরমমপি ৱিজ্ঞানমশিষত্॥ ৮॥

পিতা শৃণৱন্ বালপ্রকরমখিলং ত্বতস্তুতিপরং
রুষান্ধঃ প্রাহৈনং কুলহতক কস্তে বলমিতি।
বলং মে বৈকুণ্ঠস্তৱ চ জগতাং চাপি স বলং
স এৱ ত্রৈলোক্যং সকলমিতি ধীরোযমগদীত্॥ ৯॥

অরে ক্বাসৌ ক্বাসৌ সকলজগদাত্মা হরিরিতি
প্রভিন্তে স্ম স্তংভং চলিতকরৱালো দিতিসুতঃ।
অতঃ পশ্চাদ্বিষ্ণো ন হি ৱদিতুমীশোস্মি সহসা
কৃপাত্মন্ ৱিশ্বাত্মন্ পৱনপুরৱাসিন্ মৃডয মাম্॥ ১০॥

**********



www.prapatti.com